ब्राह्मणक्शत्रियविशां शूद्राणां च परंतप ।

कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ १८.४१ ॥

brāhmaṇakśatriyaviśāṁ śūdrāṇāṁ ca parantapa ।
karmāṇi pravibhaktāni svabhāvaprabhavairguṇaiḥ ।। 18.41।।

शमो दमस्तपः शौचं क्शान्तिरार्जवमेव च ।

ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ १८.४२ ॥

śamo damastapaḥ śaucaṁ kśāntirārjavameva ca ।
jñānaṁ vijñānamāstikyaṁ brahmakarma svabhāvajam ।। 18.42।।

शौर्यं तेजो धृतिर्दाक्श्यं युद्धे चाप्यपलायनम् ।

दानमीश्वरभावश्च क्शात्रं कर्म स्वभावजम् ॥ १८.४३ ॥

śauryaṁ tejo dhṛtirdākśyaṁ yuddhe cāpyapalāyanam ।
dānamīśvarabhāvaśca kśātraṁ karma svabhāvajam ।। 18.43।।

कृषिगौरक्श्यवाणिज्यं वैश्यकर्म स्वभावजम् ।

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ १८.४४ ॥

kṛṣigaurakśyavāṇijyaṁ vaiśyakarma svabhāvajam ।
paricaryātmakaṁ karma śūdrasyāpi svabhāvajam ।। 18.44।।

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।

स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ १८.४५ ॥

sve sve karmaṇyabhirataḥ saṁsiddhiṁ labhate naraḥ ।
svakarmanirataḥ siddhiṁ yathā vindati tacchṛṇu ।। 18.45।।